80—तदित्समानमाशाते वेनन्ता न प्र युच्छतः । धृतव्रताय दाशुषे ॥ ६ ॥

Then तत् only इत्, when inspiration and expiration वेनन्ता without न neglect प्रयुच्छतः attain आशाते to evenness समानं for being a beneficent person दाशुषे, firm धृतं in vows व्रताय,

Note.—For a person it is necessary to attain quietude to see the Divine light within. The control of breath is a great means to check the volatile mind.

☞ This verse is connected with the followin

81—वेदा यो वीनां पदमन्तरिक्षेण पतताम् । वेद नावः समुद्रियः ॥ ७ ॥

God is known, who यः knows वेद the place पदं of the worlds वीनां, moving पततां in the firmament अन्तरिक्षेण, also, knows वेद that of sea समुद्रियः vessels नावः ।

Note.—God alone knows all the world and the safety of our vessels.

82—वेद मासो धृतव्रतो द्वादश प्रजावतः । वेदा य उप जायते ॥ ८ ॥

The Upholder of laws धृतव्रतः knows वेद the twelve द्वादश months मासः, encompassing creatures प्रजावतः, and also knows वेद what यः is produced उपजायते or the intercalary month.

Note.—God knows time and whatever is born there.

83—वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः । वेदा ये अध्यासते ॥ ९ ॥

He knows वेद the way वर्त्तनिं of the immense उरोः, increasing बृहतः and all-reaching ऋष्वस्य air, and also knows वेद whatever ये beings exist अध्यासते there.

Note.—God knows the immense ether and all the deities in existence in the sky.

84—नि षसाद धृतव्रतो वरुणः पस्त्या३ स्वा । साम्राज्याय सुक्रतुः १०॥

The Supreme वरुणः God of excellent सु works क्रतुः sits or is present निषसाद in creatures पस्त्यासु for universal rule साम्राज्याय ।

Note.—God maintains His universal rule by His omnipresence. Nothing is out of His sight.

85—अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति । कृतानि या च कर्त्वा ११

So अतः a sage चिकित्वान् sees अभिपश्यति all विश्वानि the wonders अद्भुता already made कृतानि and च which या will be made कर्त्वा ।

Note.—A person looking towards God attains immense knowledge.

86—स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् । प्र ण आयूंषि तारिषत् १२

He सः, the good सु maker क्रतुः, the eternal आदित्यः, puts करत् us नः on the righteous सु path पथा all विश्व the days अहा and increases प्रतारिषत् our नः lives आयूंषि ।

Note.—God when realised shows us the right path, confers immortality on us.

87—बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम्। परि स्पशो नि षेदिरे॥१३

The Supreme वरुणः God exists वस्त, wearing बिभ्रत् a glorious हिरण्ययं and pure निर्णिजं armour द्रापिं, and His rays स्पशः settle निषेदिरे around परि।

Note.—The person of God is all glory, and so He is the light of all.

88—न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्। न देवमभिमातयः॥१४

(Adore) The Deity देवं, whom यं neither न enemies दिप्सवः nor न the haters द्रुह्वाणः of people जनानां or creatures, nor न sinners अभिमातयः or proud persons dare defy दिप्सन्ति,

Note.—The Supreme Being is the condition of all existence, so none can go against It. This verse is joined to the following.

89—उत यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा॥१५॥

And उत who यः has completely असामि made चक्रे light यशः in man मानुषेषु or thinkers, and in our अस्माकं interiors उदरेषु or animal heat.

Note.—God has given light to us and placed life or cause of growth in us all.

90—परा मे यन्ति धीतयो गावो न गव्यूतीरनु। इच्छन्तीरुरुचक्षसम्॥१६

My मे faculties or intellects धीतयः desirous इच्छन्तीः to see the all-seer उरुचक्षसं go यन्ति beyond परा, as न cows गावः to अनु cow-pens गव्यूतीः।

Note.—Intensity of desire to realise God expedites a man's progress towards God.

91—सं नु वोचावहै पुनर्यतो मे मध्वाभृतम्। होतेव क्षदसे प्रियम्॥१७॥

Let us (God and the soul) again पुनः talk वोचावहै well सं नु so that यतः Thou acceptest क्षदसे my मे offered आभृतं and pleasant प्रियं honey मधु of knowledge as इव does a priest होता।

Note.—When the soul communes with God, He blesses her knowledge, as a priest pronounces a blessing on an offering.

92—दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि। एता जुषत मे गिरः॥१८

I saw दृशं the Light of all विश्वदर्शतं। I saw दृशं His chariot or resting place रथं on अधि the earth क्षमि। He accepted जुषत these एताः hymns गिरः of mine मे।

Note.—The verse also means.—

'Use जुषत these एताः hymns गिरः of mine मे to see दृशं the Light of all विश्वदर्शितं, nay नु to see दृशं happiness रथं on the mind on अधि the earth क्षमि।

93—इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके ॥१९॥

O Supreme God वरुण, hear श्रुधि this इमं invocation हवं of mine मे to-day अद्य and च comfort मृडय us! I desirous of protection अवस्युः beseech आचके Thee त्वाम्।

Note.—Righteous desires are granted by God, such as desires for knowledge, &c.

94—त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि। स यामनि प्रति श्रुधि २०

O Sage मेधिर of the universe विश्वस्य, Thou त्वं art the king or light राजसि of the heaven दिवः and च earth ग्मः। Being such स, do Thou respond प्रतिश्रुधि now यामनि to our prayer!

Note.—God hears whatever people say. So nothing ill should ever be uttered or done.

95—उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत। अवाधमानि जीवसे॥२१॥

Remove मुमुग्धि our नः good उत्तमं and mediocre मध्यमं temptations पाशं and उत् destroy व्यवचृत our lowest temptations अधमानि to live जीवसे according to Thy will!

Note.—Man encounters three difficulties or Gordian knots, viz., intellectual, moral, and physical. When these are removed, his life prolongs and enjoys God.

Prose order and explanation in Sanscrit—

25 १ हे वरुण पूज्य देव परमेश्वर, वयं विशोयथा प्रजा भूत्वा ते व्रतं नियमम् आज्ञां द्यवि द्यवि प्रतिदिनं खंडयामः उल्लंघयामः तत् त्वं करुणां कृत्वा प्रपूरय क्षमस्व।

२ हे वरुण, नो अस्माकं वधाय हननाय जिहीडानस्य अनादरं कृतवतः जनस्य हत्नवे हननाय (हन् क्नु) हृणानस्य लज्जितस्य जनस्य उपरि मन्यवे क्रोधाय मा रीरधः न संराधय न उद्यतो भव (राध संसिद्धौ चङ्)।

३ हे वरुण, न यथा रथी रथस्वामी संदितं श्रान्तम् अश्वं विश्रामाय बध्नाति तद्वत् वयं मृडीकाय सुखाय ते त्वयि अस्माकं मनः चित्तं गीर्भिः स्तुतिभिः विषीमहि निमग्नं कुर्मः।

४ हे वरुण, वस्य इष्टये ( वसु धनं यम् प्रत्ययः मतुप् अर्थे ) धनवतः जीवनस्य लाभाय मे विमन्यवः विगतमन्यु-विचाराः शान्तवृतयः वसती : निवासस्थानम् उप प्रति समीपे वयः पक्षी न इव हि निश्चयेन परा दूरं पतन्ति गच्छन्ति। परमेश्वरं प्राप्तुं मे शान्तं मनः वेगेन धावति।

५ कदा वयं क्षत्रश्रियं क्षत्रस्य राज्यस्य श्रीः शोभा यः तं सर्वेषां राजानम् उरुचक्षसम् उरु महत् चक्षुः दृष्टिः यस्य तं सर्व-द्रष्टारं वरुणं पूज्यमीश्वरं मृडीकाय मोक्ष-सुखाय नरं नेतारं कवलम् उपास्यम् आ करामहे करवाम विधेम। यदा मनुष्यः परमेश्वरं सर्वदा मनसः पुरस्तात् प्रत्येके कर्मणि करोति तदा स मोक्षम् आप्नोति।

६ धृतव्रताय धृतं धारितम् अनुष्ठितं व्रतं सत्यभाषणादि कर्म येन तस्मै पूजकाय दाशुषे दात्रे ( दाश् दाने क्वसु प्रत्ययः दाश् वस् वस्य सं प्रसारयं दाश् उस् तस्मै ) वेनन्ता ( वेनतिः कान्ति कर्मा ) शोभमानौ कान्तियुक्तौ मित्रावरुणौ समानं तद् इत् एव तदेव साधारणं कर्म आशाते अश्नुवाते पश्यतः न प्रयुच्छतः प्रसादं न कुर्वतः सदा अनुग्रहणीतः। मित्रावरुणौ अस्मिन् स्थले न वर्णितौ तौ एकौ देवो भवतः एक देवस्य विशेषणौ स्तः।

७ यः वरुणः अन्तरिक्षेण आकाशमार्गेण पततां गच्छतां वीनां पक्षिणां पदं वेद जानाति, यः समुद्रियः समुद्रे व्यापकः वरुणः नावः जले गच्छन्त्यः पदं वेद।

८ धृतव्रतः धृतानि धारितानि रक्षितानि व्रतानि सृष्टिनियमाः येन सः वरुणः प्रजावतः प्रजायुक्तान् द्वादश मासः चैत्रादीन् वेद यः वरुणः यद् उपजायते उत्पद्यते तदेव वेद जानाति अर्थात् सर्वं जानाति।

९ उरोः विस्तीर्णस्य ऋष्वस्य सर्वत्र गमनशीलस्य बृहतः महतः वातस्य वायोः वर्तनिं मार्गं वेद, ये च अध्यासते उपरि तिष्ठन्ति तान् एव स वेद।

१० धृतव्रतः नियम-पालकः सुक्रतुः शोभनकर्मा वरुणः साम्राज्याय सर्वत्र राज्यकरणाय पस्त्यासु प्रजासु पस्त्यं गृहं गृहेषु वसन्तः जानाः तेषु आनिषसाद विराजते ( लिट् )

११ चिकित्वान् ज्ञानवान् ( कित ज्ञाने लिट् क्वसु प्रत्ययः ) विश्वानि सर्वाणि अद्भुतानि कृतानि निर्मितानि वस्तूनि यानि च कर्त्वा कर्तव्यानि

अतः वरुणाद् आगतानि अभिपश्यति अवलोकयति ! वरुण एव सर्व-वस्तूनां खर्त्ता इति जानाति ।

१२ स सुक्रतुः शोभनप्रज्ञः आदित्यः अविनाशी ईश्वरः विश्वाहा सर्वेषु अहः सु सदा नः अस्मान् सुपथा शुभमार्गेण करत् करोतु ( लेट् ) नः अस्माकं आयूंषि प्रतारिषत् प्रवर्धयतु ( लेट् )

१३ वरुणः परमेश्वरः हिरण्ययं तेजोमयं द्रापिं कवचं (द्रा कुत्सायां गतौ द्राभ्यः कुटिल-कर्मभ्यः पायति रक्षति तत् धर्मज्ञानं इ प्रत्ययः तदेव ईश्वरस्य कवचं बिभ्रत् धारयन् निर्णिजं शुद्धिं ( णिजिर् शौचपोषणयोः ) वस्त आच्छादयति रक्षति, तस्य स्पशः रश्मयः परि सर्वतः निषेदिरे विद्यन्ते ।

१४ यं वरुणं दिप्सवः शत्रवः न दिप्सन्ति हिंसितुम् इच्छन्ति न च जनानां द्रुह्वाणः द्रुह्यन्ति न च अभिमातयः पाप्मानः ( अभिमातिः अभिमानं ) देवं वरुणं स्पृशन्ति ( स सर्व-जगत उपरि वर्तते )

१५ यः वरुणः मानुषेषु यशः अन्नम् आचक्रे कृतवान् उत अपि च अस्माकम् उदरेषु पाचकशक्तिम् आचक्रे । स एव पूजनीयो भवति ।

१६ उरुचक्षसं सर्व-द्रष्टारं वरुणम् इच्छन्तीः मे धीतयः बुद्धयः गावः न इव गव्यूतीः स्थानम् अनु प्रति परादूरं यन्ति गच्छन्ति । मे मम: परमेश्वरं द्रष्टुं शीघ्रं धावति ।

१७ हे वरुण, पुनः नु परस्परं आवां सं वोचावहै सम्यग् वदेथाम्, यतः यस्मात् मे मधु सर्वेषां आत्मा रसः आभृतं समन्तात् तृप्तं पुष्टं ( भृ पोषणे क्त ) भवेत्, त्वं होता इव यथा होमकर्त्ता प्रियं हविं दत्तं भोजनं खादयति तद्वत् प्रियं स्वीकृतं यजमानं क्षदसे अश्नासि स्वीकरोषि ( क्षद् भक्षणे ) !

१८ नु क्षिप्रं विश्वदर्शतं सर्वैः दर्शनीयं ( दृश् अवलोकने अतच् प्रत्ययः ) परमेश्वरं दर्शम् अहं पश्येम ( अङ् ); क्षमि भूमौ रथं परमेश्वरस्य यानं पादपीठम् जीवम् आत्मानं अहम् अधिदर्शम् अनुपश्येम्; एताः मे गिरः स्तुतयः जुषत जुषन्ताम् स्वीकृताः भवन्तु ।

१९ हे वरुण, मे इमं हवम् आह्वानं श्रुधि शृणु, अद्य अस्मिन् दिने कर्मणि च मृडय सुखय, त्वाम् अवस्युः रक्षणेच्छुः ( अवस् रक्षा यु प्रत्ययः ) अहम् आ समन्तात् चके स्तौमि ( कै गै शब्दे लिट् ) !

२० हे मेधिर मेधाविन् सर्वज्ञ, त्वं दिवः द्युलोकस्य च ग्मः भूलोकस्य च अपि विश्वस्य सर्वस्य जगतः मध्ये राजसि राज्यं करोषि ईशिसे, स तादृशः त्वं यामनि क्षेमप्रापणे ( या प्रापणे मनिन् प्रत्ययः ) प्रतिश्रुधि आज्ञापनं कुरु, क्षेमं देहि ।

२१ हे वरुण, जीवसे जीवितुं ( तुमर्थे से प्रत्ययः ) मोक्ष-प्रापणाय नः अस्माकम् उत्तमं पाशं श्रेष्ठं सांसारिकं बन्धनं यथा राजपदं गुरुत्वं धनपतित्वमादिम् उन् मुमुग्धि उत्कृष्य मोचय दूरीकुरु, एतस्मिन् संबन्धने मे इच्छा मा भूत्, एवं मध्यमं पाशं विचृत विनाशय, अधमानि निकृष्टानि पाशान् च अवचृत नाशय। संसारस्य संबन्धनानि त्यक्त्वा परमेश्वरस्य चरणे चित्तं लगित्वा च जीवो मुक्तो भवति न अन्यथा।

Meanings of Sanscrit—

25 1 O Adorable God, since we, Thy subjects, every day infringe Thy law, do Thou, being merciful, forgive us !

2 O God, do not be inclined to kill us, to kill a person doing no reverence, and to be angry at the person feeling shame !

3. O Adorable God, we absorbe our mind in contemplating Thee by means of prayers to get joy and rest, as a charioteer ties the fatigued horse for rest !

4 O God, my dispassionate and serene thoughts certainly soar aloft like birds towards the home to get enriched life in Thee ! Calm thoughts quickly go to God.

5 When shall we know God, the beauty of government, the Ruler of all creatures, the seer of all objects, and woriship Him the adorable, and the leader of us all, for the joy of salvation ? When a man always keeps God before his mind in all works, he obtains salvation.

6 God, the friend and the adorable, accepts the common offering of invocation from a generous worshipper, who has taken the vow of veracity and other kinds of virtue, ( darh : to give and us affix ). He is glorious and merciful, never indifferent to His children. Mitra-Varuna are two words for two attributes of God. They do not mean two gods, but they mean one God only.

7 God knows where birds soar in the sky. He knows where vessels sail on the sea.

8 The Supreme God Varuna who has made the laws of nature, knows the 12 months, and whatever is born therein. In fact, He knows all the world.

9 He knows the extensive region where the air exists, and whatever there is above the ærial region.

10 To hold His rule everywhere, Varunâ, the Supreme God, the protector of His laws, doer of good deeds, dwells in the people living in houses.

11 A wise man ( kit :to know) beholds all the wonders of nature and its actions come from God the Supreme. He believes Varuna God is the maker of all things.

12 May God of glorious wisdom, eternal, lead us always by righteous paths ! May He prolong our life !

13 The Supreme God Varuna wearing the resplendent armour of holiness and knowledge, protects holiness. His rays prevail everywhere.

14 No enemy dare wish to injure the Deity, nor can the haters of people, or sinners approach Him. He is above all the world.

15 That Deity is adorable who has made food for people and who has made the digestive power in our stomach.

16 My mind desires to see the Supreme God Varuna, and goes far as cows run towards their mangers. My mind hastens with great speed to see God.

17 O Supreme God, we may mutually talk well, so that my mind, the essence of all things, may become completely satisfied. Like the ministering priest who eats the offered food with relish, Thou acceptest Thy worshipper.

18 May I soon see God whom all the people wish to see ! Then may I see His footstool, His vehicle on earth, which is the human mind ! These my prayers may be accepted.

19 O Supreme God, listen to this prayer of mine ! Give us ease today in this work of worship. I desirous of Thy protection fervently pray.

20 O All-wise God, Thou rulest all the universe, the heaven above and the earth below ! Thou mayest give us our good.

21 O Supreme God, cast off from me the best tie to the world, as kingdom, supremacy, great wealth, &c. so that I may obtain salvation ! Let Thy will, and not my will, be done in this matter. In the same manner, destroy the ties of the world of the middling kind, and of the lowest kind ! Having abandoned all the worldly ties and rivetting attention on the feet of God, the mind obtains immortality, but not otherwise.

---o---

**26 ऋषिः शुनः शेपः । देवता अग्निः । छन्दः गायत्री ।**

SEER : SHUNA SHEPA, SUBJECT : AGNI ; METRE : GAYATRI.

96—वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते । सेमं नो अध्वरं यज ॥१॥

O Sacrificer मियेध्य, master पते of foods ऊर्जां, put on वसिष्व clothes वस्त्राणि, Being such सः, perform यज this इमं sacrifice अध्वरं of ours नः !

Note.—Without the company of good persons no happiness can be attained. Sacrifice means in Sanscrit any good work, either religious or secular. This is said by the priest to his followers.

97—नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः । अग्ने दिवित्मता वचः२

O ever सदा powerful यविष्ठ God अग्ने, Thou art our नः best वरेण्यः sacrificer होता by Thy many kinds of knowledge मन्मभिः and by Thy glorious दिवित्मता speech वचः of science !

Note.—People should perform all works in conjunction with all others.

98—आ हि ष्मा सूनवे पितापिर्यजत्यापये । सखा सख्ये वरेण्यः ॥३॥

For हि, the father पिता sacrifices आयजति or does a good work for the son सूनवे, a woman आपिः for her relation आपये, and a best वरेण्यः friend सखा for his or her friend सख्ये ।

Note.—Persons should be induced to do good to all like God.

99—आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा । सीदन्तु मनुषो यथा॥४

Like यथा man मनुषः let the destroyers of devils रिशादसः, the best वरुणः friend मित्रः and the judge अर्यमा grace आसीदन्तु our नः sacrifice.

Note.—Persons should learn politeness in all things.

100—पूर्व्य होतरस्य नो मन्दस्व सख्यस्य च । इमा उ षु श्रुधी गिरः ॥५॥

O our नः ancient पूर्व्य sacrificer होतः, be pleased मन्दस्व with this अस्य friendly सख्यस्य work and च hear श्रुधि these इमाः speeches गिरः or hymns well सु !

Note.—All persons should be friends of one another and acquiring knowledge become great.

101—यच्चिद्धि शश्वता तना देवं देवं यजामहे । त्वे इद्धूयते हविः ॥६॥

Whenever यच्चित् we worship यजामहे God देवं and God देवं alone हि from a long तना time शश्वता, our offering हविः or invocation is made हूयते for Thee त्वे alone इत्!

Note.—Persons should ascertain how the objects of the world are coming down from eternity.

102—प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः । प्रियाः स्वग्नयो वयम् ॥७

Let the good God मन्द्रः and the best वरेण्यः giver होता, the lord पतिः of people विशः, be अस्तु dear प्रियः to us नः ! We वयं with our duties well done स्वग्नयः become dear प्रियाः to all.

Note.—Let all be friendly to one another. When duties are well done, no disagreement arises among people. Swagnaya means duties towards the father, mother, and teacher.

103—स्वग्नयो हि वार्यं देवासो दधिरे च नः । स्वग्नयो मनामहे ॥ ८ ॥

For हि, learned people देवासः with their duties well done स्वग्नयः offer दधिरे us नः a boon वार्यं or present, and च we having done our duties स्वग्नयः become learned मनामहे ।

Note.—People should acquire knowledge to understand all the objects of the world.

104—अथा न उभयेषाममृतमर्त्यानाम् । मिथः सन्तु प्रशस्तयः ॥ ९ ॥

And अथ let our नः praises प्रशस्तयः of both उभयेषां immortals and mortals अमृत मर्त्यानां be सन्तु mutual मिथः।

Note.—People should give up hatred and pride, acquire knowledge and do good deeds to one another.

105—विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः । च नो धाः सहसो यहो॥१०

O most skillful यहो God अग्ने, make धाः this इमं sacrifice यज्ञं and च this इदं our नः speech वचः or hymn endowed with विश्वेभिः all the energies अग्निभिः of Thy power सहसः।

Note.—It is God that bestows energy on man so that he is able to do good.

Prose order and explanation in Sanscrit.—

26 १ हे मियेध्य दिवम् आरोहयितः ( मिनोति प्रक्षिपति पदार्थान् आकाशं प्रति यः स संबोधने। मि क्षेपणे केध्यच् प्रत्ययः ) ऊर्जां बलानाम् अन्नानां पते स्वामिन्, वस्त्राणि आच्छादकानि तेजांसि वसिष्व धारय। अस्मभ्यं तेजो विद्यां देहि। स तादृशः त्वं नो अस्माकम् अध्वरं यज्ञं कार्यं यज संपादय पवित्रीकुरु हि खलु निश्चयेन।

२ हे यविष्ठ अनन्तबलयुक्त अग्ने परमेश्वर, सदा मन्मभिः ज्ञानिभिः ( मन ज्ञाने मनिन् प्रत्ययः इन् इत् ) दिवित्मता ( दिवं प्रकाशं स्वर्गम् इन्धते प्राप्यते येन तत् दिवित् वेदज्ञानं मन्त्रः मतुप् प्रत्ययः) मंत्रयुक्तया ज्ञानवत्या वचः वचसा ( छन्दसि सुपां लुक् ) वरेण्यः स्तुतः ( वृ वरेण एण्यः प्रत्ययः ) सन् नः अस्माकं होता दाता निषीदसि नितरां भवसि ( उपसर्गे प्रयुक्ते योग्या क्रिया प्रयुक्त्या ) अथवा निहोता सदा सुखदाता असि।

३ हि यथा वरेण्यः श्रेष्ठः पिता सूनवे पुत्राय आ सर्वथा यजति ददाति आपिः बन्धुः आपये बंधवे, सखा सुहृद् सख्ये सुहृदे ददाति तद्वत् स्म निश्चयेन त्वं नो ददासि।

४ यथा येन प्रकारेण वरुणः विद्वान् मित्रः सर्वसुहृद् अर्यमा न्यायः कर्त्ता रिशादसः दुष्टनाशकाः ( रिशन्ति हिन्सन्ति ये शत्रुवः तान् अदन्ति नाशयन्ति ते ) मनुषः मर्त्याः ( मन ज्ञाने उस् प्रत्ययः ) नः बर्हि यज्ञम् आ सर्वतः सीदन्तु आसताम्। अस्माकं मध्ये सर्वे यथाशक्ति वरुणवत् भवन्तु।

५ हे पूर्व्य सर्वेषां पूर्ववर्तिन् होतः दातः, अस्य सख्यस्य सर्वहित कर्मणः मन्स्व मोदस्व ( तेन प्रसन्नो भव ), इमाः च गिरः वाणीः वेद-वचः उषु पुनः पुनः श्रुधी शृणु।

६ हि खलु यच्चिद् यद्यपि शश्वता नित्येन तना विस्तृतेन कालेन ( तन् तनोति विस्तारे अच् वा क्विप् प्रत्ययः ) देवं २ त्वदन्यं देवं यजामहे पूजयामः, त्वे त्वयि ( सप्तमी शे आदेशः ) इत् एव हविः हूयते ते आह्वाणं क्रियते ( सर्वे स्वस्वदेवेन परमेश्वरमेव उपासते।

७ विशपतिः विशां प्रजानां पतिः पालकः, होता दाता, वरेण्यः स्वीकर्तुं योग्यः मन्द्रः हृष्टः प्रियः स्नेहयुक्तः नः अस्माकम् अस्तु, स्वग्नयः अग्नेः परमेश्वराद् उत्पन्नाः वयम् अपि प्रियाः भवन्तु। परस्परं प्रीति-युक्ताः सन्तु।

८ स्वग्नयः शोभनम् अग्नि-ज्ञानं येषां ते ईश्वर-परायणाः देवासः ( आज्जसेरसुग् ) विद्वांसः नः अस्माकं वार्यं वरितुं योग्यं पदार्थसमूहं दधिरे अधारयन् वयं च स्वग्नयः सन्तः त्वां मनामहे स्मरामः।

९ अथ कर्मानुष्ठानाद् अनन्तरं हे अमृत अजर अग्ने, मर्त्यानां साधारण-मनुष्याणां नः च उभयेषां मिथः परस्परं प्रशस्तयः प्रशंसाः सन्तु। संसारे अन्योऽन्यं स्नेहयन्तः त्वां च पूजयन्तः निवसेम।

१० हे अग्ने सहसोयहो, विश्वेभिः अग्निभिः देवैः सह इमं यज्ञं इदं च नः वचः स्तोत्रं स्वीकृत्य शान्ति धाः देहि अथवा यज्ञं स्तोत्रं च संस्थापय।

Meanings of Sanscrit—

26 1 O God, causing ascent heavenward, (mi : to throw up) the Lord of food and strength, maintain Thy glory all around! Give us light or knowledge. Being so powerful, O God, enable us to finish our holy work and accept it!

2 O omnipotent adorable God, praised by means of speech, pregnant with knowledge and the Veda mantras, leading to heaven, and ever surrounded by angels or wise saved persons, Thou art ever our donor, or Thou art our constant giver of ease!

3 For, Thou certainly givest us good things, as the best father ever does the son, or a relative does a relative, and a friend does a friend!

4 O God, do Thou favour us, so that a learned man, a friend of all, a judge, destroyers of enemies, mortals, may attend our holy work! Let all be godly.

5 O God, most ancient benefactor, be pleased with this work good to all, and again and again hear these Vedic hymns!

6 Tho' we each worship a Deity for ever more, yet the invocation of Thee alone is done in each case! All persons worship God alone by means of their own gods.

7 Let the Lord of creatures, benefactor, adorable God, be gracious to us. We, too, the scintilla of the Divine Fire, may be loving and kind to one another.

8 Learned men, devoted to God, and whose knowledge of God is praiseworthy, protect all our best objects! O God, we being afire with devotion meditate on Thee!

9 O immortal, undecaying, adorable God, after our good work, let our praise and fame be mutual, i. e., let one another's good name be well known! Loving one another in the world and worshipping Thee, we may live on the earth!

10 O God, the protector of strength, accompanied by all the angels, having accepted this prayer, give us food, quality of reverence and peace!

---o---

**27 ऋषिः शुनः शेपः । देवता अग्निः । छन्दः गायत्री ।**

SEER : SHUNA SHEPA, SUBJECT : AGNI : METRE : GAYATRI.

106—अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् १

( We turn our mind ) to adore वन्दध्या Thee त्वा, O God, the adorable Deity अग्निं, the light सम्राजन्तं of righteous deeds अध्वराणां, with ( humble ) salutations नमोभिः, warding off our enemies with Thy light as न a horse अश्वं does gnats with the mane वारवन्तं ।

Note.—As a learned man reigns in his country from his great qualities of learning, so the Deity reigns supreme in the whole world from his omniscience. Vara comes from Vri to cover, hence a could. It also means water. God is the true light and not electricity, so God alone should be adored.

107—स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः । मीढ्वाँ अस्माकं बभूयात् २

May that स most सु happy शेवः omni- पृथु present प्रगामा Sun or producer सूनुः of us नः by His very घ power शवसा be बभूयात् our अस्माकं showerer मीढ्वान् of blessings!

Note.—God sends blessings to us as the sun brings rain.

108—स नो दूराच्चासाच्च नि मर्त्यादघायोः । पाहि सदमिद्विश्वायुः ॥ ३ ॥

Protect निपाहि us नः, O Lord, स the life आयुः of the universe विश्व, ever सदं more इत् from a sinful अघायोः mortal मर्त्यात् both near आसात् and च far off दूरात् !

Note.—As God is present in all the universe, He alone can protect us from evil-doers everywhere.

109—इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् । अग्ने देवेषु प्रवोचः ॥४॥

O God अग्ने, do Thou त्वं proclaim प्रवोचः this इमं new नव्यासं good सु blessing सनिं of Vedic गायत्रं prayer of ours अस्माकं among learned people देवेषु or in the shining worlds!

Note.—May God give Vedic mode of divine service to all people !

110—आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अन्तमस्य ॥५॥

Teach आशिक्ष and give आभज us नः the final अन्तमस्य wealth वस्वः in the solar or highe परमेषु, planetary or firmamental मध्येषु, and terrestrial or alimental वाजेषु regions.

Note.—All planets are divided into three kinds, upper, middle, and lower, so that people can gradually acquire knowledge according to their capacities.

111—विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि ६

O ( God of ) wonderful चित्र glory भानो, Thou art असि the apportioner of things विभक्ता, Thou showerest क्षरसि ( blessings ) upon a generous worker दाशुषे soon सद्यः like आ the waves ऊर्माः of the sea सिन्धोः !

Note.—As the sea divides its water into small atoms by waves, which shower plenty on the land, so does God give blessings to a generous man.

112—यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥७॥

O God अग्ने, that सः mortal मर्त्यं, whom यं Thou protectest अव in battles पृत्सु and whom यं Thou inspirest जुनाः or actuatest in sacrificial works वाजेषु, will ever शश्वतीः control यन्ता the desires इषः or creatures, or provide for them !

Note.—The person who worships the all-protecting and all-pervading God, never suffers troubles or defeat. The person who is engaged in good work, is the master of the senses.

113—नकिरस्य सहन्त्य पर्येता कयस्य चित् । वाजो अस्ति श्रवाय्यः ॥८॥

O merciful सहन्त्य God, that अस्य learned person's कयस्य righteousness नकिः is अस्ति popular पर्येता and चित् power वाजः worth hearing श्रवाय्यः !

Note.—Learned persons never go against God's commandments. Their power and knowledge become the subject of everybody's talk.

114—स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता । विप्रेभिरस्तु सनिता ॥ ९ ॥

Let that सः universal विश्व man चर्षणिः be अस्तु the leader तरुता with the inferior अर्वद्भिः and divider सनिता ( of wealth ) with the superior विप्रेभिः people.

Note.—That man can become the leader of the masses, who is God-fearing and the co-sharer of God's wealth with the learned.

115—जराबोध तद्विविड्ढि विशे विशे यज्ञियाय । स्तोमं रुद्राय दृशीकम्॥१॥

O God, known बोध by Thy attributes जरा, infuse विविड्ढि that तत् wonderful दृशीकं knowledge स्तोमं of Thee into every (common) person विशे विशे, and the pious यज्ञियाय and the learned रुद्राय man.

Note.—If the knowledge of God is given to all people, they will become virtuous and useful to one another.

116—स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः । धिये वाजाय हिन्वतु॥१॥

May that सः great महान्, boundless अनिमानः and exceedingly पुरु glorious चन्द्रः Comet धूमकेतुः actuate हिन्वतु us नः for action or wisdom धिये and for strength वाजाय!

Note.—It is God who impels persons to obtain knowledge.

117—स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः॥२॥

May that सः glorious दैव्यः Lord पतिः of people विशः, the dispeller of diseases केतुः, the great बृहत् sun भानुः, hear शृणोतु us नः by means of prayers उक्थैः like इव a wealthy person रेवान्!

Note.—As a learned man hears all with love, so does God hears the prayers of his children.

118—नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।

यजाम देवान् यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः॥१३॥

If यदि we can शक्नवाम, we should honour यजाम learned persons देवान् by giving food नमः to the great महद्भ्यः, food नमः to the small अर्भकेभ्यः, food नमः to the young युवभ्यः, food नमः to the old आशिनेभ्यः। O learned people देवाः, may I never मा eschew आवृक्षि any praise शंसं to great ज्यायसः! Metre: Trishtup

Note.—All should be supplied with food, the learned should never be disrespected, rather maintained by all means. One should never withhold praise of the learned.

Prose order and explanation in Sanscrit—

27 १ अध्वराणां यज्ञानां सम्राजन्तं प्रकाशयन्तं श्रेष्ठकर्म दर्शयन्तम् अग्निं देवं वारवन्तं वालवन्तं रश्मिवन्तम् अश्वं वह्निं न इव नमोभिः नमस्कारैः वन्दध्यै वन्दध्यै वन्दितुं वयं प्रवृत्ताः । तुमर्थे अध्यै इत्यादेशः ।

अश्नोति व्याप्नोति इति अश्वः तुरंगो वन्हिः वा। ईश्वरो वन्हिरिव दुष्टान् वारयति।

२ स घ एव अग्निः नः अस्माकं शवसा बलेन पृथुप्रगामा पृथु विस्तीर्णं गामः गमनं यस्य स सर्वत्रगामी सुशेवः सुष्ठुतया शेवं सुखं यस्मात् स सुखदः सूनुः सूर्यः सुनोति उत्पादयति स उत्पादकः अस्माकं मीढ्वान् कामानां वर्षिता बभूयात् भवेत् ( लिट आशीर्लिङ्ग )

३ स तादृशः त्वं विश्वायुः विश्वं सर्वम् आयुः यस्मात् स सर्वजीवनं सन् दूरात् आसात् समीपात् च अघायोः अघं पापम् कर्तुम् इच्छति स तस्मात् दुष्टात् मर्त्यात् मनुष्यात् नः अस्मान् सदम् इत् सदैव नि नितरां पाहि त्रायस्व।

४ हे अग्ने ईश्वर, त्वम् उ एव इमम् अस्माकं सनि सनन्ति संभजन्ति सुखानि यस्मिन् तत् सुखप्रदं नव्यासमं नवतरं गायत्रं स्तोत्रं वेद-चतुष्टयं देवेषु विद्वत्सु सु सुष्ठु प्रयोचः प्रोक्तवान् असि। ईश्वरो वेदज्ञानं सज्जनेषु आदितो न्यधात्।

५ परमेषु उत्कृष्टेषु स्वर्गीयेषु द्युलोकेषु मध्यमेषु सामान्येषु अन्तरिक्षेषु वाजेषु यज्ञेषु बलेषु नः अस्मान् आभज प्रापय उत्तमं मध्यमं बलं नो देहि। अन्तमस्य भूलोकस्य वस्वः वसूनि आशिक्ष देहि। तेषामुपार्जन-मुपदिश।

६ हे चित्रभानो चित्रः अद्भुतः भानुः दीप्तिः यस्य स संबोधने आश्चर्य-विद्या-प्रकाश, सिन्धोः समुद्रस्य ऊर्मा ऊर्मौ तरंगे जलकणाः आ इव विभक्ता पदार्थानां विभागकर्त्ता दाता उपाके समीपे असि दाशुषे यजमानाय सद्यः शीघ्रं क्षरसि कर्मफलानां वृष्टिं सत्योपदेशेन बोधान् करोषि।

७ हे अग्ने यं मर्त्यं मनुष्यं पृत्सु संग्रामेषु अवाः रक्षसि यं वाजेषु यज्ञेषु जुनाः प्रेरयसि स नरः शश्वतीः नित्यानि इषः अन्नानि अथवा नित्याः प्रजाः यन्ता निग्रहीता नियमिष्यति रक्षिष्यति। यं परमेश्वरो रक्षति स अन्यान् सदा रक्षति।

८ हे सहन्त्य सहनशील, अस्य तव उपासकस्य रक्षितस्य कयस्य चिकेति जानाति स कयः घञ् प्रत्ययः धर्मज्ञस्य पर्येता आक्रमिता शत्रुः चित् एव नकिः न अस्ति, तस्य वाजः बलं श्रवाय्यः श्रवणीयः प्रसिद्धः अस्ति। यः परमेश्वर-परायणः तस्माद् अन्ये बिभ्यते। नकिः नार्थे अव्ययः।

९ सः ईश्वर-रक्षितः विश्व-चर्षणिः विश्वस्य ईश्वरस्य कर्षति स चर्षणिः नि प्रत्ययः मनुष्यः भगवदुपासकः अर्वद्भिः अश्वैः सहितः वाजं

संग्रामं तरुता तर्त्ता तारयिता जेतुं समर्थः अस्तु भवेत्, विप्रेभिः विद्वद्भिः सहितः सनिता ज्ञानस्य सुखस्य विभक्ता दाता अस्तु ( सन् दाने ) !

१० हे जराबोध जरया स्तुत्या बोधः ज्ञानं यस्य सः संबोधने वन्द्यमान अग्ने, यज्ञियाय यज्ञस्य कर्त्रे रुद्राय स्तोत्रे अर्थात् तस्य उपरि कृपां कर्तुं विशे २ प्रत्येकस्य तत् दृशीकं दर्शनीयं सुन्दरं स्तोत्रं स्तुतिसमूहं बिविड्ढि व्याप्नुहि प्रकाशय स्वकृपया पुनीहि तत्। विश् व्यापने लोट् हस्य ढः।

११ सः महान् गुणाधिकः अनिमानः न विद्यते निमानं परिमाणं यस्य सः अव्ययः धूमकेतुः धूनोति कम्पयति संसारं चालयति स गतिकर्मा पुरुः व्यापकः चन्द्रः आनन्द-स्वरूपः ( चदि आल्हादे ) नः धियै कर्मणे बुद्धिबर्धनाय बाजाय बलाय हिन्वतु प्रीणातु प्रसन्नो भवतु ।

१२ स. बिश्पतिः विशां प्रजानां पतिः पालकः नृपालः दैव्यः दिव्यस्वरूपः केतुः ज्ञानहेतुः अथवा चिकित्साति रोगं निवारयति सः कित् धातुः रोग निबारकः बृहत् महान् भानुः सूर्यः अग्निः देवः उक्थैः स्तुतिभिः मंत्रैः रेवान् धनबान् इव नः प्रार्थनां शृणोतु ।

१३ महद्भ्यो नमः, अर्भकेभ्यः अल्पेभ्यो नमः, युवभ्यः तरुणेभ्यः, आशिनेभ्यो बृद्धेभ्यो नमः ये चतुर्विधाः देवाः सन्ति तेभ्यो नमः । यदि शक्नवाम देवान् विदुषः यजाम सत्कुर्माम । हे देवाः, ज्यायसः बृद्धस्य स्थविरस्य शंसं गुणानुबादं मा आवृक्षि अहं कदापि न वर्जयेयम् ( वृज लुङ् ) बिदुषः सदा समन्येम ।

Meanings of Sanscrit.—

27 1 We are engaged in bowing with salutations to the All-pervading God, the illuminer of righteous works, revealer of the best undertakings, the Divine Fire encircled with the glory of the rays ( of knowledge and light. Vandhya ; to bow, the affix adhyai for tomun of the Infinitive mood, replaced by da, of which d is elided. Ashnoti ; he pervades, is the root Ashwa : all pervading God. In common language it means a horse from swiftness and fire. God like fire wards off the wicked.

2. May that Deity alone, with His almight, be our blesser of righteous desires ! He can reach all distant places swiftly. He satisfactorily gives us ease. He is the sun or producer of all creatures.

3 O God, being such, Thou art the source of life of all the world, protect us ever from those mortals who desire to do evil, whether far or near !

4 O adorable God, Thou alone art our giver of pleasures here! Thou spokest the newest harmonious Word, the four-fold Vedas, man's prayer, to the learned most excellently ! God deposits spiritual knowledge, the science of the Vedas, from all beginning.

5 Enable us to acquire the best power in the highest heaven, in the central region, in the firmamant. In other words. give us the best and middling power. Give us the riches of the world, the lowest in material existence, that is, teach us how to acquire them !

6 O God, the ocean of wondrful knowledge and light, Thou art the giver of the objects of the world, and their decomposer like the particles of water in the sea waves ! Thou rainest the fruits of actions quickly over the geneous saint !

7 O Adorable God, that man whom Thou preservest in battles, whom Thou strengthenest in various struggles and in acts of charity, will always control and protect the creatures and their food supply. He ever protects others, whom God protects.

8 O All-merciful God, there is no enemy or oppressor at all of Thy servant, protected by Thee and conversant with duties ! His power is well known. Other creatures fear him who has resigned himself to God. ( Naki means no. )

9 That God-protected man (who attracts Divine grace), the servant of God in company with angels or Divine powers ( Ashwaih ), is able to win a battle. May he become the dispenser of ease and imparter of knowledge with the aid of the learned.

10 Glorious God, whose knowledge is got by means of prayers, graciously sanctify the beauteous hymnology in each of its hymns to show favour to the performer of righteous works ! (Vish : to obtain, ha becomes dha. Imperative.)

11 May the great, immeasurable, undecaying God, the mover of the world, the cause of motion, all-pervading, all-joy, ( chadi : to be happy ), be gracious to us to elevate our sense and to promote our power.

12 May the Adorable God, the protector of creatures, Divine source of knowledge, curer of diseases ( kit : to cure ) Great Sun, Lord of wealth, hear our prayer expressed in the hymns of the Vedas !

13 Salutation to the great, salutation to the small, salutation to the young, salutation to the elders, salutation to the four classes of the learned or angels. Let us revere the learned as much as we can. *O learned men or angels,* may I never be short of reverence and grateful expressions to the elders ! May I ever honor the learned !

———o———

**28 ऋषिः शुनः शेपः । देवता इन्द्रः । छन्दः ६अनुष्टुप्३ गायत्री ।**
**स्वरः षड्जः ।**

SEER : SHUNA SHEPA, SUBJECT : INDRA : METRE : 6ANUSHTUP3 GAYATRI,
MUSICAL NOTE : SHADJA.

119—यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ।
उलूखलसुतानाम् अवेदु इन्द्र जल्गुलः ॥ १ ॥

O God इन्द्र, for their betterment सोतवे protect अव and इत् उ accept जल्गुलः the children सुतानां of Nature उलूखल, in which यत्र the rocks ग्रावाः become भवति much पृथु developed बुध्नः !

Note.—It also means that man should mix medicines by means of a mortar and a pestle for their improvement.

Ulukhala I translate to be Nature or the sourcre of development. It also means a mortar.

120—यत्र द्वाविव जघना अधिषवण्या कृता । उलू० ॥ २ ॥

O God, protect and accept the children of Nature, in which यत्र, as it were इव, both द्वौ causes of destruction जघनौ are made कृतौ the sources of birth अधिषवण्यौ of higher life !

Note.—The causes of one's destruction or stagnation of mind, i. e., worldly activity and ignorance of higher life, are made to produce higher life in man, when the world is managed after God.

The second part of the four verses is repeated as is usual in hymns. It is here omitted in the following three verses. In translation it becomes the first.

121—यत्र नारी अपच्यवम् उपच्यवं च शिक्षते । उलू० ॥ ३ ॥

O God, protect and accept the children of Nature, the source of development, where यत्र woman नारी teaches शिक्षते us how to spend अपच्यं and च how to earn उपच्यं !

Note.—If the management of the world be entrusted to woman as is the case with our households, there will be as much peace and happiness in the world as at home, and the true universal brotherhood or the system of patriarchal family be established all over the world. Men will then devote themselves to self's improvement instead of murdering one another as in war.

122—यत्र मन्थां विबध्नते रश्मीन् यमितवा इव । उलू० ॥ ४ ॥

O God, protect and accept the children of Nature, where यत्र people bind विबध्नते ropes रश्मीन्, as it were इव, to a churning rod मन्थां to sift यमितवा things.

Note.—It means that great exertions produce good things. Ropes and a churning rod appear to be emblematic of vigorous means to obtain the blessings of the world.

123—यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ ५ ॥

O sonorifier क of the world उलूखल, since यच्चित् Thou त्वं art communed युज्यसे in every house गृहे गृहे, tell वद us, therefore हि, here इह the most तमं glorious द्युमत् things with the trumpets दुन्दुभिः of victors जयतां, so to speak इव !

Note.—We are so deaf to the silent voice of Nature, that unless God awakens us with the shrill sound of trumpets, there can be no rising of us at all.

124—उत स्म ते वनस्पते वातो विवात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोमम् उलूखल ॥ ६ ॥

O Lord of the world वनस्पते, motion वातः is already gone विवाति forth from अग्रमित् Thee ते, so अथो, O Nature उलूखल, create सुनु vegetation सोमं for God इन्द्राय to protect पातवे creatures.

Note.—God gives an impetus to Nature to evolute.

125—आयजी वाजसातमा ता ह्युच्चा विजर्भृतः । हरी इवान्धांसि बप्सता ॥

Those ता man and woman आयजी, become brave

वाजसातमा, may हि, they perform विजभृतः great works उच्चा, who like इव horses हरी are fed वप्सता on grains अन्धांसि ।

Note.—Vegetarian Diet develops excellent physique. The Bible teaches the same. See Genesis.

126—ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः । इन्द्राय मधुमत्सुतम्॥८

Those ता beautiful ऋष्वौ protectors of houses वनस्पती create for us नः here अद्य the sweet मधुमत् produce of the earth सुतं for God इन्द्राय by beautiful ऋष्वेभिः means of creation सोतृभिः ।

Note.—The household life is the suupport of all other orders of people.

127—उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज । नि धेहि गोरधि त्वचि ॥९

Create आसृज vegetation सोमं in purity पवित्रे, give भर its produce उच्छिष्टं to consumers चम्वोः ( man and woman ), and put निधेहि it upon अधि the crust त्वचि of the earth गोः ।

Note.—The ground should be tilled and laid with plants to be consumed by man and woman.

Prose order and explanation in Sanscrit.—

28 १ हे इन्द्र ईश्वर, उलूखल सुतानां ब्रह्मपुत्राणां ( गृहं ) इत् एव अव रक्ष, यत्र पृथुबुध्नः पृथु विस्तीर्णं बुध्नः ज्ञानं यस्मिन् स ज्ञानघनः ग्रावा गृह्णाति येन स विचारः तस्य मेघः ज्ञानप्रचुर-विचार-मेघः ऊर्ध्वः ईश्वराभिमुखः भवति सोतवे नूतन-विचार-प्रसवनाय, तथा जल्गुलः पुनः २ उपदिश । यास्के—उलूखलम् उरुकरं वा उर्करं वा ऊर्ध्वखम् उलू उरु तत् अन्तरिक्षम् खः द्यौः खलति गच्छति अधः खलः नाम पृथिवी । अतः उलूखल शब्दस्य अर्थः द्यावा-भूमी रस्य लः । माता भूमिः पर्जन्यः पिता नः तस्मात् द्यावा-भूम्योः सुतः मनुष्यः ब्रह्मपुत्रः । बुध्नः मेघः बोधति जानाति नक् प्रत्ययः धोवः ज्ञानं । सोतवे तुमर्थे तवे । जल्गुलः यङ् गृ शब्दे ऋतः उरः रस्य लः कोः चुः अभ्यासे ऋतः अत् रस्य लः गृ, गृ गृ, जुरगुर् जल्गुल् लेट् सिप् जल्गुलः शब्दय उपदिश ।

२ हे इन्द्र अनुष्ठाने रतानां मनुष्याणां गृहम् अव, यत्र द्वौ जघनौ इव जंघन्यते हन्यते येन सः हननस्य प्रापणस्य हेतुः विद्याविषये स तु द्विविधः दर्शनं करणं च वस्तुनः सम्यक् निरीक्षणं पुनः हस्तेन तस्य निर्माणं संसिद्धिः एताभ्यां हेतुभ्यां वस्तुज्ञानं पूर्णं भवति एतौ अत्र अधि-षवण्य-शब्देन उक्तौ अर्थात् विद्योपार्जनहेतू यस्मिन् गृहे विद्येते हे इन्द्र तद् रक्ष इति प्रार्थना । अधिपूर्वकषुधातुः उत्पादनार्थे ।

३ हे इन्द्र तद् गृहं रक्ष यत्र उलूखलसुतानां द्यावाभूम्योः पुत्राणां नारी गृहपत्नी अवच्यवं गृहाद् वहिर्गमनम् उपच्यवं गृहस्य अन्तर्गमनं च शिक्षते अधीते अर्थात् गृहकार्यं बाह्य-व्यवहारं कर्तुं यतते। च्युङ् गतौ। धर्मात्मानां पत्नी कर्मणि कुशला भवति।

४ हे देव तं परिवारं रक्ष यत्र मन्थां मन्थानं दधिवलोरण-दण्डं रश्मीन् रज्जूः विवध्नते विशेषेण बध्नन्ति यमितवा यमितवै यमितुं इव घृत-निःसारणाय। धर्मात्मानः गृहे समस्त-कार्यं स्वहस्तेन कुर्वन्ति, अन्यान् जनान् स्वसेवार्थं न प्रेरयन्ति, कांश्चित् दासान् न कुर्वन्ति।

५ हे उलूखलक उरु उच्चैः खम् अन्तरिक्षं लाति अददाति धारयति वा सः ईश्वरः उलूखलः रस्य लः। अथवा उलूखले द्यावाभूमी तयोः यं कायन्ति शब्दयन्ति गायन्ति स्मरयन्ति सर्वाः प्रजाः सः ईश्वरः संबोधने इन्द्र, यत् चित् हि यतः त्वं गृहे २ प्रतिगृहं युज्यसे स्थापितः असि इह संसारे पूज्यसे ( युज योगे ) अतएव जयतां विजयकर्तॄणां दुंदुभिः नृसिंहैः इव द्युमत्तमं प्रकाशमयं ज्ञान-दीप्ति-प्रदायकं शब्दम् उपदेशं वद अस्मान् शिक्षितान् कुरु।

६ हे वनस्पते वनानां जलानां वृक्षाणां पतिः पालकः संबोधने वनस्पते, ते अग्रम् इत् पुरस्तादेव वातः पवनः विवाति चलति स्म पवन-वन्हि-जलादि-द्रव्याणां गत्याः परमेश्वरस्य आस्तित्वं प्रतीयते अथो तथा हे उलूखल द्यावापृथिवीस्थ-प्रजासमूह इन्द्राय पातवे पातुं रक्षार्थं सोमं कृषि व्रीहि-यवादि सुनु उत्पादय। ईश्वरस्य रक्षा पूर्वेषु मंत्रेषु प्रार्थिता, अस्मिन् ऋषिः लोकान् उपदिशति कृषिं कर्तुम्।

७ हि यतः तौ उ एव आयजी कर्म-कर्त्तारौ (यजेः करणे इ प्रत्ययः) वाजम् अन्नं सनति ददाति ( सनः दाने आ प्रत्ययः ) अन्न-दातारौ उच्चा उत्कृष्टौ सन्तौ विजर्भृतः पुनः २ हरतः ( हृग्रहोः भः छन्दसि ) कर्याणि कुरुतः इव यथा हरी विद्युत्-चम्बकौ सूर्यस्य अश्वौ अंधांसि अंधकारान् बप्सता भक्षतः दूरी कुरुतः। द्वौ मनुष्यौ, क्षत्रि-यवैश्यौ सर्वं कार्यं कुरुतः यथा विद्युत् चम्बकः सर्वम् अंधकारं नाशयतः।

८ तौ ऋष्वौ महान्तौ वनस्पती संसार-पालकौ ऋष्वेभिः महद्भिः स्तोतृभिः सह अद्य साम्प्रतं मधुमत् प्रशस्त-गुणोपेतं नः सुतं कृषिफलं इन्द्राय ईश्वरार्थम् उत्पादयताम्। यत् मनुष्यः करोति तद् ईश्वरार्थम् एव अर्थात् सर्वोपकाराय कुर्यात्। स्तोतृगणो ज्योतिषं जानाति तेन वर्षन-कालादि दर्शयति यतः कृषिफलम् उत्तमं भवति।

९ चम्वोः सेनयोः द्वयोः जात्योः उच्छिष्टम् अवशिष्टम् अधिकं सोमं कृषिफलम् अन्नं पवित्रे शुद्धे स्थाने भर धर आसृज समन्तात् वप, गोः

पृथिव्याः त्वाचि स्थले अधि उपरि निधेहि स्थापय। यत् किंचित् भोगाद् अधिकं तत् अन्येभ्यो देशेभ्यो देहि।

Meanings of Sanscrit—

28 1 O Almighty God, protect the home of the children of heaven, where alone the cloud of ideas of extensive knowledge, tending God-ward, are born to generate new ideas; and teach them often and often. ( Yaska thus explains the word ulukhala : uru karam or uru : firmament, khalati : goes. Khala means the earth, and ulu or uru means high or the heaven; hence, it means the heaven and earth. As the earth is regarded as the mother, and the heaven or clouds the father, the sons of the heaven and earth are mankind. The word budhna means knowledge, coming from budh : to know with nak affix. Sotavey : to generate, from su : to produce and tavey affix in the sense of toom: infinitive. The word jalgula is a frequentative form of gri : to sound, 2d person singular, late tense, which is the Vedic present. )

2 O Almighty God, protect the home of men, engaged in religious work, where *there exists the two-fold* cause of destruction and construction in the field of knowledge, i. e., the observation and experiment of things The knowledge of things becomes perfect when well observed and repeatedly manipulated. The prayer here is, O Almighty God, protect the house where the principal means of acquiring knowledge are satisfactorily found ! Adhi-shavanya means productive, adhi : a preposition and shu : to produce.

3 O Almighty God, protect that house where the wife of the sons of the heaven and earth is taught how to go out of and how to behave in it, i. e., all the duties both of outside and of inside. The root chyung : to go. The wife of virtuous men becomes clever in work.

4 O God, protect that family, wherein cords are wound around the churning rod to make butter ! Virtuous people do all the works at home with their hands; they do not make

other people serve them, nor do they make a slave of anybody.

5 O Almighty God, who holds the high heaven ( ulu or uru: high and khala: sky, l for r), or whom all the creatures in the heaven and earth call upon in prayer, teach us, give us advice, full of light, as it were, with the trumpets of victors; since Thou art worshipped in the world and established in every household, i. e., invoked by all of us!

6 O Lord of plants and waters, the wind blows before Thee, i. e., by Thy order! The motion of the air, fire, water and other elements proves the existence of God. O host of creatures, existing in the heaven and earth, raise crops of cereals to ask for God's protection! The poet prayed for God's protection in the previous verses. He in this verse advises the people to take to cultivation.

7 For, those two agents, ( the heaven and earth, or the cloud and land, or the husband and wife in a household ), the dispensers of food, being eminent, do all work, as the two ays of the sun, —electricity and magnetism, the two horses of the sun, so to speak, dispel darkness. The two classes of of human fraternity, namely, warriors and merchants, do all work, as electricity and magnetism dispel darkness in the world.

8 Those two great peoples ( warriors and merchants ), the protectors of plants and the world, together with the singers of God's praise, i. e., priests, may produce a honeyed, excellent crop for God's purpose. Whatever man does, he does for God's sake, i. e., he should do all work for the good of all creatures. The band of singers or priests knows astronomy, whereby it predicts seasons, shows the time of rain, which makes agriculture excellent.

9 Collect or deposit at a clean spot the produce of the field over and above the use of the two classes, and entirely

till the ground to produce corn for others. Whatever is in excess of consumption, should be given to other countries.

—o—

**29** ऋषिः शुनः शेपः । देवता इन्द्रः । छन्दः पंक्तिः । स्वरः पंचमः ।

SEER : SHUNA SHEPA, SUBJECT : INDRA ; METRE : PANKTI, Note PANCHAMA.

128—यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ॥

O God इन्द्र, the protector पाः of the world सोम, the very हि truth सत्य, and the lord of great तुवि wealth मघ, though यच्चिद् we are स्मसि unglorious अनाशस्ता, as it were इव, yet तु make us नः great आशंसय in cattle गोषु, horses अश्वेषु, and thousands सहस्रेषु of good शुभ्रिषु things !

Note.—Persons, if not filled with divine energy, are prone to indolence and misery. When they acquire great wealth, they should devote it to the good of people in general. The 1st line has 16, the 2d 24 syllables.

129—शिप्रिन् वाजानां पते शचीवस्तव दंसना । आ तू० ॥ २ ॥

O God इन्द्र, the almighty शिप्रिन् Lord पते of creatures वाजानां, impulsive शचीवः is Thy तव speech or inspiration दंसना, make us नः great आशंसय, in thousands सहस्रेषु of good शुभ्रिषु cows गोषु and horses अश्वेषु !

Note.—It is God's impulse that makes persons take great strides in progress. All good thoughts come from Him who watches over our good.

130—निष्वापया मिथूदृशा सस्तामबुध्यमाने । आ तू० ॥ ३ ॥

O God इन्द्र, remove निष्वापय our attachment to the world and negligence मिथूदृशा, and other wicked desires सस्त नबुध्यमाने, and make us great in all kinds of wealth !

Note—Persons should give up indolence and engage themselves in the performance of good works.

131—ससन्तु त्या अरातयो बोधन्तु शूर रातयः । आ तू० ॥ ४ ॥

O valorous शूर and most wealthy तुविमघ God इन्द्र, let the त्याः misers अरातयः sleep समन्तु and donors रातयः awake बोधन्तु, and make us great in wealth !

Note—It is well that selfish people should become inactive and unselfish active, so that people in general may enjoy happiness.

132—समिन्द्र गर्दभं मृण नुवन्तं पापयामुया । आ तू० ॥ ५ ॥

O God इन्द्र of great wealth, frustrate संमृण the dull person गर्दभं, praising नुवन्तं Thee by sinful पापया speech अमुया, and make us great in wealth of all kinds !

Note.—That person is at last ruined who plays the hypocrite.

133—पताति कुण्डृणाच्या दूरं वातो वनादधि । आ तू० ॥ ६ ॥

Just as the air वातः goes पताति far दूरं from अधि a forest वनात् by a devious path कुण्डृणाच्या, so let Thy grace pass hrough us in various ways, and make us great in wealth.

